# 2015

## SANSKRIT

## [ Honours ]

## PAPER – II

*Full Marks* : 90

*Time* : 4 hours

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

## [ NEW SYLLABUS ]

**1.** स्वप्नवासवदत्तमिति रूपके प्रथमाङ्कस्थितब्रह्मचारिवृत्तान्तस्य नाटकीयतात्पर्यं निरूप्यताम् । 10

*अथवा*

मिथ्योन्मादैश्च युद्धैश्च शास्त्रदृष्टैश्च मन्त्रिनैः ।
भवद्यत्नैः खलु वयं मज्जमानाः समुद्धृताः ।।

— श्लोकस्यास्य कः वक्ता ? कमुद्दिश्य उक्तमिदम् ? अस्य तात्पर्यं स्पष्टीक्रियताम् ।

2. अधोलिखितानां पद्यानामेकतरं सुरगिरा व्याख्येयम् (देवनागर्यां लिख्यताम्) — 8

(*a*) कः कं शक्तो रक्षितुं मृत्युकाले रज्जुच्छेदे के घटं धारयन्ति ।
एवं लोकस्तुल्यधर्मा वनानां काले काले छिद्यते रुह्यते च ।।

(*b*) सुखमर्थो भवेद् दातुं सुखं प्राणाः सुखं तपः ।
सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम् ।।

3. अधोलिखितेषु प्रश्नषट्कं सुरगिरा देवनागर्या च समाधेयम् — 1 × 6

(*a*) क आसीद् वासवदत्तायाः पिता ?

(*b*) स्वप्नवासवदत्तमिति रूपके विदूषकः केन नाम्ना व्यपदिश्यते ?

(*c*) पद्मावती किमर्थं तपोवनं समागता ?

(*d*) कः आसीत् रुमण्वान् ?

(*e*) उदयनस्य प्रतिपक्षीयनृपस्य किं नामासीत् ?

(*f*) का आसीत् घोषवती ?

(*g*) आवन्तिकायाः परिचयः प्रदीयताम् ।

4. अधोलिखितानां त्रयाणां प्रकृतिप्रत्ययः निरूप्यताम् : — 2 × 3

शक्तः, दातुम्, मज्जमानाः, रक्षणम्, समुद्धृताः ।

5. दुर्वासा शकुन्तलां किमभिशशाप ? किमासीत् शकुन्तलां प्रति तस्य क्रोधकारणम् ? शापस्यास्य तात्पर्यमालोच्यताम् । 3 + 2 + 7

*अथवा*

का आसीत् हंसपदिका ? किं सङ्गीतं तया परिवेशितम् ? अस्य तात्पर्यं निरूप्यताम् । 2 + 3 + 7

6. निम्नलिखितेषु पद्यमेकं सुरगिरा व्याख्येयम् (देवनागर्या लिख्यताम्) — 8

(*a*) मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः ।
न प्रभातरलं ज्योतिरुदेति वसुधातलात् ।।

(*b*) अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः ।
जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा ।।

7. अधस्तनेषु एकतरस्य सुरगिरा भावसम्प्रसारणं कार्यम् (देवनागर्या लिख्यताम्) — 4

(*a*) भवितव्यानां द्वाराणि भवन्ति सर्वत्र ।

(*b*) बलवदपि शिक्षितानामत्मन्यप्रत्ययं चेतः ।

8. निम्नलिखितेषु प्रश्नेषु द्वादशानामुत्तरं प्रदीयताम् (सुरगिरा देवनागर्या लिख्यताम्) — 1 × 12

(*a*) कण्वमुनेराश्रमः कुत्र विद्यते ?

(*b*) अभिज्ञानशकुन्तलमिति नाटकस्य मङ्गलाचरणे कस्य वृत्तस्य प्रयोगः दृश्यते ?

(*c*) के शकुन्तलायाः सख्यौ ?

(*d*) कण्वः किमर्थं सोमतीर्थं गतः ?

(*e*) दुष्यन्तस्य तपोवनसमागमस्य किं कारणम् ?

(*f*) कैः सह शकुन्तला पतिगृहमुद्दिश्य अगच्छत् ?

(*g*) कौ आसीत् शकुन्तलायाः पितरौ ?

(*h*) अभिज्ञानाङ्गुरीयकं शकुन्तलायाः हस्तात् कुत्र भ्रष्टम् ?

(*i*) विदुषकः दुष्यन्तस्य प्रासादे केन आक्रान्तोऽभवत् ?

(*j*) परिहासविजल्पितं सखे ! परमार्थेन न गृह्यतां वचः — केन कस्मै उक्तम् ?

(*k*) दुष्यन्तस्य पुत्रस्य किं नाम आसीत् ?

(*l*) 'अभिज्ञानशकुन्तलम्' — इति नाटके मुख्यरसः कः ?

(*m*) किं नाम गान्धर्वविवाहः ?

(*n*) का आसीत् सानुमती ?

(*o*) अस्य नाटकस्य प्रारम्भे कस्य कालस्य वर्णना उपलभ्यते ?

9. अधोलिखितानां चतुर्णां प्राकृतपदानां संस्कृतरूपं लिख्यताम्: — 4

अज्जउत्तो, भमरेहिं, सुउमारकेसरसिहाइं, अहिणवमहुलोलुवो, परिच्चत्रणच्चणा, लाअकीए, भावमिश्शेहिं, गिह्मविरलपा-अवच्छाआसु ।

10. पताकास्थानविषये आचार्यविश्वनाथस्य मतं संक्षेपेणालोच्यताम् । 10

*अथवा*

का नाम अर्थकृतिः ? सा कतिविधा ? प्रत्येकं विभागं सविस्तरम् आलोच्य नाट्ये तेषामुपयोगः प्रदर्श्यताम् ।

11. विषयमेकमाश्रित्य टीका लेख्या — 5

प्रस्तावना, आरभटीवृत्तिः, विष्कम्भकः ।

12. अधोलिखितेषु पञ्च प्रश्नाः समाधेयाः (सुरगिरा देवनागर्या) — 1 × 5

(*a*) उपरूपकाणि कतिविधाः ?

(*b*) चम्पूकाव्यस्य किं लक्षणम् ?

(*c*) दिव्यादिव्यनायकस्य उदाहरणं दीयताम् ।

(*d*) किमर्थं नान्दी अवश्यकरणीया ?

(*e*) किं नाम आकाशभाषितम् ?

(*f*) अभिनयः कतिविधः ?

(*g*) प्रकरणस्य किमुदाहरणम् ?

———